# तृतीयः पाठः

# सङ्गणकः



**अभिषेकः** – हे! भ्रातः! तव हस्ते किमस्ति ?

**भ्राता** – अभिनन्दनपत्रमिदम्।

**अभिषेकः** – कस्य अभिनन्दनपत्रम्।

**भ्राता** – भो! अनुज ! न जानासि त्वम्। अद्य ममवर्धापनदिनमस्ति। मम मित्रेण प्रेषितमिदम्।

**अभिषेकः** – अतीव शोभनं चित्रं दृश्यते। शुभसंदेशोऽपि रमणीयः। कथं केन च इदं विरच्यते।

**भ्राता** – श्रृणु! इदं चित्रं न केनचित् चित्रकारेण चित्रितम्। संदेशोऽपि न केनापि हस्तेन लिखितः। "कम्प्यूटर" नामक यन्त्रेण सर्वं क्रियते।

**अभिषेकः** – भो भ्रातः! किमेतद् "कम्प्यूटर" नाम पूर्वं मया तस्य नाम न श्रुतम्। अस्य यन्त्रस्य विषये कथय।

**भ्राता** – 'कम्प्यूटर' विषये ज्ञातुमिच्छसि। तर्हि श्रृणु। विद्युच्छक्ति–संचालितमिदं यन्त्रम्। अनेन यन्त्रेण सर्वविधा–गणना कर्तुं शक्यते।

**अभिषेकः** – किमनेन यन्त्रेण चित्राणि अपि चित्रीयन्ते ?

**भ्राता** – आम्,–हे अनुज! अतीव चमत्कारकारि इदं यन्त्रम्। न केवलं चित्राणि चित्रीकरोति, अपितु लेखनकार्यमपि करोति। रेलयात्रायाः आरक्षणं करोति। अस्मिन् यन्त्रे पुस्तकानि अपि उद्टङ्कितानि भवन्ति।

**अभिषेकः** – भ्रातः ! 'कम्प्यूटर' विषये सर्वं–एतद् श्रुत्वा जिज्ञासा अतीव वर्धते। किमनेन यन्त्रेण संदेशानाम् आदानप्रदानम् अपि भवति ?

**भ्राता** – भो ! बालक। सुष्ठु पृष्टम्। आधुनिकयुगे अनेन सङ्गणकयन्त्रेण महत्वपूर्णसंदेशानां प्रेषणमपि भवति।

**अभिषेकः** – अतएव मम मित्रं "इंटरनेट" इति माध्यमेन स्वमातुलं अमेरिकादेशे संदेशं प्रेषयति। हे भ्रातः! इदं "इंटरनेट" इति किमस्ति।

**भ्राता** – देशविदेशेषु समाचाराणाम् आदानप्रदानार्थं परस्परं संयोजनार्थं नवीनतमं माध्यममस्ति।

**अभिषेकः** – अस्य यन्त्रस्य उपयोगः मया श्रुतः। सम्प्रति अहं ज्ञातुमिच्छामि यत् अस्य यन्त्रस्य आविष्कारः केन कदा कृतः।

**भ्राता** – कथयामि अनुज! प्रथम "कम्प्यूटरस्य" निर्माणं "चार्ल्स बैवेज" महोदयेन 1833 वर्षे कृतम्।

**भ्राता** – अतीव प्रसन्नोऽहम् भो ! अनुज ! अस्मिन् युगे कम्प्यूटर आवश्यकमेव। दूरदर्शनवत् अस्य एकः बहिः पटल (स्क्रीन Screen) वर्तते। तच्च "मानीटर" – इत्युच्यते। एका कीलकपट्टिका वर्तते। (Key Board) "सी.पी.यू." (सेन्ट्रल प्रोग्राम यूनिट C.P.U.) इति सङ्गणकस्य (कम्प्यूटरस्य) विषयवस्तूनाम् संग्रहकेन्द्रं भवति। "सी.पी.यू" सङ्गणकस्य मस्तिष्कः भवति। सङ्गणके एकः "माउस" वर्तते। "माउस" लेख सङ्कलनं व्यवस्थितं करोति। लेखप्रकाशनाय प्रकाशनयन्त्रं "प्रिंटर" (Printer) वर्तते। "स्कैनर" इति संकलन सामग्रीं यथावत् प्रददाति।

**अभिषेकः** – हे भ्रातः! ध्वनियन्त्रं किमस्ति? अहं ज्ञातुमिच्छामि।

**भ्राता** – अनुज! श्रृणु ! ध्वनियन्त्रस्य माध्यमेन संदेशः "सी.पी.यू." समीपे प्रेष्यते। पश्चात् "मानीटर" इति माध्यमेन प्रकाशितः संदेशः प्राप्यते।

**अभिषेकः** – हे भ्रातः! एक एव प्रश्नः मम मनसि अवशिष्टः। यत् कम्प्यूटरे काचिद् क्रीडां कर्त्तुं शक्यते।

**भ्राता** – अनुज! शोभनः प्रश्नः। अस्मिन् यन्त्रे विविधाः क्रीडा अपि सन्ति। (कम्प्यूटरखेल) बालकाः तत्र क्रीडन्ति प्रसन्ना भवन्ति। अस्तु बालक! सम्प्रति अहम् इन्टरनेट–माध्यमेन स्वमित्राय अभिनन्दनपत्रस्य प्राप्तिसूचना प्रेषयितुं गच्छामि।

## शब्दार्थाः

किमस्ति = (किम् + अस्ति) क्या है। केनचिद् = कोई। संदेशोऽपि = संदेश भी। लिखितः = (लिख्+क्त) लिखा गया है। कम्प्यूटर = सङ्गणक। ज्ञातुमिच्छति = (ज्ञातुम्+इच्छति) जानने की इच्छा। चित्राणि = चित्रों को। चित्रीकरोति = चित्रित करता है। पुस्तकानि = पुस्तकों को। उट्टङ्कितानि भवन्ति = लेख टंकित किये जाते है। संयोजनार्थं = जोड़ने के लिए। बहिः पटल = मानीटर। कीलकपट्टिका = कीलक पट्टी (Key Board)।

## अभ्यासः

**प्रश्न 1. निम्नांकित प्रश्नों के उत्तर दीजिए –**

(क) सङ्गणकस्य परिभाषा देया ?

(ख) मॉनीटर इति किमुच्यते ?

(ग) सी.पी.यू. इत्यस्य का परिभाषा ?

(घ) "स्कैनर" किं कार्यं करोति ?

(ङ.) केन महोदयेन सङ्गणकः निर्मितः ?

(च) अधुना केन माध्यमेन अतिशीघ्रमेव पत्रं प्रेषितुं शक्यते ?

**प्रश्न 2. संस्कृत में अनुवाद कीजिए –**

(1) सर्वगणना यन्त्र सङ्गणक होता है।

(2) प्रथम सङ्गणक के रचयिता कौन थे।

(3) आधुनिक युग में सङ्गणक एक महत्वपूर्ण यन्त्र है।

(4) सङ्गणक में एक कीलक पट्टिका होती है।

(5) 'इन्टरनेट' के माध्यम से अभिनन्दन पत्र भेजता हूँ।

**प्रश्न 3. "भ्रातृ" शब्द की कारक रचना लिखिए ?**

PSUTT7